श्री आदिनारायण स्तवः

श्री आदिनारायण स्तवः

ऋषय ऊचुः |
नमः परमकळ्याण कळ्याणायात्मयोगिने |
जनार्दनायदेवाय श्रीधराय सुवेधसे || 1 ||

नमः परमकिंजल्क सुवर्णमुकुटाय च |
केशवायातिसूक्ष्माय बृहन्मूर्ते नमो नमः || 2 ||

नमः पंकजनाभाय हरये हरिवेधसे |
नमो हिरण्यगर्भाय जगतः कारणात्मने || 3 ||

अच्युताय नमो नित्यमुन्नताय नमो नमः |
नमो मायापटच्छन्न जगद्धात्रे महात्मने || 4 ||

संसारसागरोत्तार ज्ञानपोतप्रदायिने |
अकुंठमतयेधात्रे सर्गस्थित्यंतकारिणे || 5 ||

यथा हि वासुदेवेति प्रोक्तं पातकनाशनं |
तथा विलयमभ्येतु दैत्योयं मेघवाहनः || 6 ||

यथा न विष्णुभक्तेषु पापं नाप्नोति संस्थितं |
तथा विनाशमायातु दैत्योयं पापकर्मकृत् || 7 ||

स्मृतमात्रो यथा विष्णुः सर्वं पापं व्यपोहति |
तथा प्रणाशमभ्येतु दैत्योयं मेघवाहनः || 8 ||

भवंतु भद्राणि समस्तदोषाः
प्रयांतु नाशं जगतोऽखिलस्य |
अभ्येत्यभक्त्या परमेश्वरस्य
स्मृते जगद्धातरिवासुदेवे || 9 ||

यस्तं पूजयते भक्त्या एकादश्यान्नरोत्तमः |
सोऽश्वमेधफलं प्राप्य मोदते दिवि देववत् || 10 ||

गोलक्षं ब्राह्मणे दत्त्वा यत्फलं प्राप्नुयान्नरः |
तदादिदेवं गोविंदं दृष्ट्वा भक्त्या फलं लभेत् || 11 ||

कलौ कृतयुगस्तेषां क्लेशास्तेषां सुखाधिकाः |
आदिनारायणो देवो येषां हृदयसंस्थितः || 12 ||

एकादश्यां रविदिने स्नात्वा सन्निहितो जले |
आदिनारायणं पूज्य मुच्यते भवबंधनात् || 13 ||

इति स्कंदपुराणे श्री आदिनारायण स्तवः ||